International Journal of Sanskrit Research 2024; 10(4): 159-160

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 159-160
© 2024 IJSR
www.anantaajournal.com
Received: 24-05-2024
Accepted: 27-06-2024

**डॉ. कृष्ण: गजेन्द्र: पण्डा**
सहायकः आचार्यः, BAPS
स्वामिनारायणसंस्कृतमहाविद्यालयः,
सारङ्गपुरम्, गुजरात, भारत

**Corresponding Author:**
**डॉ. कृष्ण: गजेन्द्र: पण्डा**
सहायकः आचार्यः, BAPS
स्वामिनारायणसंस्कृतमहाविद्यालयः,
सारङ्गपुरम्, गुजरात, भारत

# परब्रह्मोपासनायै आदर्शरीति: तत्फलञ्च

**डॉ. कृष्ण: गजेन्द्र: पण्डा**

## प्रस्तावना

वेदान्तशास्त्रे विविधस्थलेषु विभिन्नप्रकारकोपासनारीतय: दरीदृश्यन्ते। कुत्रचित्तु क्रतो: महिमा अपरत्र विद्याया अनिवार्यता उक्ता परब्रह्मोपासनायै। किं केवलं तपोव्रतजपोपोषणादिसाधनै: परमेश्वरप्राप्ति: ? परमेश्वरस्य प्राप्त्यै परमेश्वरस्य उपासना कर्तव्या एव। सा उपासना कीदृशी ? उपासना कथं कर्तव्येति प्रश्ने सति उदेति संशयः यत् परमात्मप्राप्तौ किम् अक्षरब्रह्मण: सेतुत्वेन उपयोग: कर्तव्यो वा नेति। अक्षरब्रह्म धनुषसदृश: जीवात्मा बाणसदृश: पुनश्च परब्रह्म तु लक्ष्यमुच्यत इत्यपि उपनिषदि लिखितम्।
तर्हि परब्रह्मण: उपासना कथं कर्तव्या? अक्षरब्रह्मणा सह स्वस्य जीवात्मन: ऐक्यं विधाय उत अन्यथेति संशय उदेति एवञ्च तस्य किं फलम् ?
स्वामीभद्रेशदासविरचितस्वामिनारायणभाष्यानुसारेण अस्य प्रश्नस्य उत्तरं संशोधकेन दीयते अस्मिन् शोधपत्रे। प्रथमन्तु पूर्वपक्षी शास्त्रसंदर्भपूर्वकं वदति यद् अक्षरब्रह्मणा सह ऐक्यं नापेक्षितं तदनु सिद्धन्तपक्षी स्वाभिलषितमतं प्रस्थापयति।
पूर्वपक्षी वदति यदक्षरब्रह्मणा सह जीवात्मन: ऐक्यं कथं वा संभवेत्, तयो: स्वरूपस्वभावगुणतश्च पृथक्त्वात् यथा न हि जले तैलं ऐक्यमाप्नोति तथैव। अत: अक्षरब्रह्मणा सह जीवात्मन: ऐक्यं नैव संभवतीति प्रतिपादयितुं पूर्वपक्षिणा संदर्भा: प्रदर्श्यन्ते यथा -

१. 'महत: परमव्यक्तम्' [1]
बुद्ध्यादिभ्यो महद्भूतात्मन: परभूतं प्रबलम् अक्षरं ब्रह्म। मायिककरणै: अक्षरब्रह्म प्रत्यक्षतया व्यक्तुमशक्यत्वाद् इन्द्रियगोचरत्वं न भजते। अनादिकालत: मायामलरहितत्वात् कथं वा मायिककरणै: अक्षरब्रह्मण: प्राप्ति: ? नैव। आत्मनस्तु इन्द्रियमनोबुद्धिचित्ताहङ्कारापेक्षयापि श्रेष्ठत्वे सत्यपि अनादिकालाद् मायावेष्टितत्वाद् अक्षरं ब्रह्म न प्राप्नोति यस्मिन् लेशोऽपि मायासंसर्गता नास्त्येव। अत: आत्मना सह अक्षरब्रह्मण: ऐक्यं व्युदस्तम्।

२. 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षर: सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते' ॥[2]
अत्र तु बद्धमुक्तसकलजीवेश्वरेभ्य: क्षरणस्वभावाऽचित्संसर्गप्राप्तत्वाद् क्षरपदवाच्याद् जीवात्मनः अक्षरब्रह्म सदैव स्वाभाविकतया पृथक्त्वं भजत इति श्लोकहृदयम्।

३. 'भेदव्यपदेशात्' [3]
ब्रह्मसूत्रे प्रथमाध्याये तृतीयपादे द्युभ्वाद्यधिकरणे अक्षरं ब्रह्मैव द्युभ्वाद्यायतनमिति, न तु जीवात्मा इत्युपदेष्टुं प्रवर्तते सूत्रमिदम्। अत्र अक्षरब्रह्मप्रत्यगात्मनो: पार्थक्यं उक्तं सूत्रकारेण।

४. 'पत्यादिशब्देभ्य:' [4]
श्रुतिषु अक्षरब्रह्म तु अधिपत्यादिशब्देभ्य: संबोधित:, तर्हि कस्योपरि तस्य आधिपत्यमिति पृष्टे सति जीवात्मेति उत्तरं लभते। अत: जीवात्माऽक्षरब्रह्मणो: भेद: स्फुट:।
अत: अक्षरब्रह्मणा सह ऐक्यं प्राप्य प्रत्यगात्मा यथोक्तरीत्या परब्रह्मोपासनं कुरुते इति तु असिद्धमिति पूर्वपक्षरव:।
अथ सिद्धान्तपक्षी ब्रवीति यदक्षरब्रह्मणा सहैक्यं प्राप्यैव परब्रह्मोपासितव्यम्। कुत: ? कारणं तत्र शास्त्रप्रसिद्धा वामदेवादय: परब्रह्मोपासितार: तथैव अवगच्छन्ति। ब्रह्मात्मैक्येनैव परब्रह्मोपासनमनुतिष्ठन्ति इत्यर्थः।
श्रुते: प्रमाणानि दीयन्ते-

१. 'अयमात्मा ब्रह्म' [5]
यथा एतत् परिदृश्यमानं सर्वमपि अक्षरब्रह्मणा व्याप्तं एवमेव सर्वान्तर्गत: अयमात्मा अपि ब्रह्मात्मक एव इति भाव: । अत: प्रत्यगात्मन: अक्षरब्रह्मणा सह ऐक्यं स्फुटम् ।

२. 'ॐ इत्येवं ध्यायथाऽऽत्मानं' [6]
अक्षरब्रह्मात्मानमेव सततमनुचिन्तयेदित्यर्थ: । गाढानुचिन्तनेन तत्साक्षात्कारं तन्मोक्षौपयिकगुणान् ध्यात्वा लभस्व इत्यर्थः । अत्रापि ध्यानमननादिना अक्षरब्रह्मणा सह साधर्म्यं प्राप्तुमुपदिष्टम् ।

३. 'योऽसावसौ पुरुषः सोऽहमस्मि' [7]
य: पुरुषः सदा परमात्मन: अतिसामीप्येन स्थित्वा पुरुषोत्तमनारायणं सेवते, स अक्षरब्रह्मात्मकपुरुष: अहमस्मीति उपासक: असकृदावृत्ति: कुर्यादिति गूढार्थ: ।
फलकथनादपि दृश्यते यदेषा स्थिति इष्टा ।
अधुना अक्षरब्रह्मणा सह प्रत्यगात्मन: ऐक्यात् कीदृशं फलं लभत इत्यपि शास्त्रे निर्दिष्टम्।

१. 'स ब्रहमयोगयुक्तात्मा सुखमक्षय्यमश्नुते' [8]
अविनाशि शाश्वतं दिव्यं परमात्मसुखं जीवात्मा भुङ्क्ते ।

२. 'स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति' [9]
ब्रहमभूत: यो जीवात्मा स: मुक्तिं लभते अस्माल्लोकात् ।

३. 'ब्रह्मभूत: प्रसन्नात्मा न शोचति न काङ्क्षति ।
सम: सर्वेषु भूतेषु मद्भक्तिं लभते पराम्' ।।[10]

अक्षरब्रह्मभावापन्नस्य को लाभ इति चेत्, स: परब्रह्मण: भक्तेराधिकारी भवतीतियावत् ।
अत: एतै: श्रुतिवाक्यै: स्फुटं यद् अक्षरब्रह्मणा सह ऐक्यं विधायैव परब्रह्मण: उपासना कार्या तत्फलञ्च मुक्तिरिति ।

## References


1. कठोपनिषत्. ३/११
2. गीता.१५/१६
3. ब्रह्मसूत्र.१/३/५
4. ब्रह्मसूत्र.१/३/४३
5. माण्डूक्योपनिषद् १/२
6. मुण्डकोपनिषद् २/२/६
7. ईशावास्योपनिषद् १६
8. गीता ५/२१
9. गीता ५/२४
10. गीता १८/५४